International Journal of Sanskrit Research 2019; 5(4): 26-28

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(4): 26-28
© 2019 IJSR
www.anantaajournal.com
Received: 19-05-2019
Accepted: 21-06-2019

**प्रस्तोत्री**
मोनिषाखरया, शोधच्छात्रा, रा.सं.सं.,
नवदेहली, भारत

**Correspondence**
**प्रस्तोत्री**
मोनिषाखरया, शोधच्छात्रा, रा.सं.सं.,
नवदेहली, भारत

# कृष्णोदयमहाकाव्ये रीतिविधानम्

**प्रस्तोत्री**

**प्रस्तावना**

"रीतिरात्मा काव्यस्य" इतियुक्त्वा वामनाचार्यः सर्वप्रथमं रीतितत्त्वं काव्ये प्रमुखं स्थानं दत्तवान् । संस्कृतवाङ्मये रीतिशब्दस्य प्रयोगः विभिन्नकाव्यशास्त्रिभिः स्वस्य दृष्टया भिन्न-भिन्नरूपेण कृतः। किन्तु रीतिसम्प्रदायस्य प्रवर्तकाः वामनाचार्याः रीतिं काव्यस्य आत्मतत्त्वं स्वीकृतवन्तः सन्ति। यद्यपि काव्यशास्त्रे रीतितत्त्वस्यान्वेषणं वामनाचार्यस्य अपेक्षया बहु पूर्वमेव सञ्जातमासीत् । किन्तु वामनाचार्यः प्रथम एतादृश आचार्य आसीत् यः स्पष्टरूपेण रीतितत्त्वस्य व्याख्यानं कृतवान्, तथा काव्यस्य आत्मतत्त्वं स्वीकृतवान् । वामनाचार्येण गुणैः सह रीतितत्त्वस्य नित्यसम्बन्धः स्थापितः।

तथा "विशिष्टा पदरचना एव रीतिः" इति उक्तवन्तः।

तद्यथा-

"रीतिरात्मा काव्यस्य[1] । विशिष्टा पदरचना रीतिः।
विशेषो गुणात्मा । सा त्रिधा- वैदर्भि गौडीया पाञ्चली च[2] ।"

अर्थात् रीतिः काव्यस्य आत्मा वर्तते । विशिष्टा पदसंरचना एव रीतिः कथ्यते । अत्र विशिष्टशब्दस्यार्थः गुणसम्पन्नः। गुणसम्पन्नता एव सुन्दरतायाः द्योतिकः वर्तते। अतः सुन्दरपदरचनायाः कला एव रीतिः इत्यवगन्तव्यम् । सा च त्रिविधा वर्तते: वैदर्भी, गौडी पाञ्चाली च।

साहित्यसर्जनसन्दर्भे कवेः हृदयनिष्ठभावानां सुन्दराभिव्याप्तिविधानम् अथवा आकर्षकप्रतिपादनशैली एवं रीतिः कथ्यते। कविः सामान्यतया साधारणर्थस्य प्रतिपादनार्थमपि असाधारणशब्दानां प्रयोगः करोति । भावाभिव्यक्ते अस्यां प्रक्रियायां कवेः सङ्केतितार्थः एक एव भवति, किन्तु तस्यार्थस्य द्योतकानां शब्दानां भिन्नतायाः कारणेन वाक्यविन्यासेनऽपि भिन्नता समायाति। अस्याः भिन्नतायाः प्रदर्शकं तत्त्वमेव रीतिः कथ्यते।

काव्यशास्त्रेतिहासस्य पर्यालोचनेन ज्ञायते यत् रीतिः अथवा मार्गशब्दस्योपयोगः आरम्भिकसमये भौगोलिकरचनावैशिष्ट्यकारणेन प्रवर्तितमासीत् । प्राचीनाचार्याणां मतमासीद्यत् विभिन्नप्रदेशवासतव्या आचार्याः स्वस्य प्रादेशिकशैल्यां काव्यरचनां कुर्वन्तः आसन् । यथा- गौडप्रदेशवास्तव्याः लेखकाः समासबहुलायां गौडीशैल्यां रचनां कुर्वन्ति स्म, तथैव विदर्भप्रदेशवास्तव्याः लेखकाः समासरहितायां वैदर्भीशैल्यां रचनां कुर्वन्ति स्म ।

वामनाचार्यस्य मतमासीद्यत् त्रिष्वपि रीतिषु समस्तगुणसम्पन्ना, समस्तगुणसमाविष्टा वा भवति वैदर्भीरीतिः । साहित्यमवलोकयामश्चेत् प्राप्यते यत् रीतितत्त्वस्य प्रथमतया विशद्विवेचनं भामहाचार्येण काव्यालङ्कारसूत्रे कृतं वर्तते । परन्तु तेन रीतिशब्दस्य स्थानि मार्गपदस्योपयोगः कृतः वर्तते । भामहाचार्यकृतग्रन्थस्याऽवलोकनेन ज्ञायते यत् तस्मिन् समये रचनाया द्वौ मार्गौ प्रतिष्ठितौ आस्ताम्। विदर्भमार्गः, गौडीयमार्गश्च। किन्तु भामहाचार्यस्य समये अनयोः मार्गयोः सम्बन्धः प्रदेशविशेषेण नाऽऽसीदिति लिखति भामहाचार्यः-

"विदर्भादिषु दृष्टत्वात् तत् समाख्या ।[3]"

---

1 काव्यालङ्कारसूत्रम्-1.2.26

2 काव्यालङ्कारसूत्रवृत्तिः-1.2.26

3 काव्यालङ्कारसूत्रम्-1.2.11,

भामहाचार्योक्तस्य कथनस्यास्य समर्थनं करोति वामनाचार्यः लिखति च-

"न पुनः देशैः किञ्चिदुपक्रियते काव्यानाम् ।[4]"

**वैदर्भीरीतेः स्वरूपम्-**

"माधुर्यव्यञ्जकैर्वर्णै रचना ललितात्मिका।
आवृतिरल्पवृतिर्वा वैदर्भी रीतिरिष्यते[5] ॥"

अर्थात् माधुर्यव्यञ्जकैर्वर्णैः समगुम्फिता समासरहिता लघु-लघु समासयुक्ता वा मनोहरा रचनाशैली वैदर्भीरीतेः भवति । रूद्रटाचार्यः एनां परिभाषयति-

"असमस्तैकसमस्ताः युक्ता दशभिर्गुणैश्च वैदर्भी।
वर्गद्वितीयबहुला, स्वरूप प्राणक्षरा च सुविधेयया[6]"

अस्याः शैल्याः प्रयोगः कविना कृष्णोदयमहाकाव्ये मुक्तकण्ठेन कृतं वर्तते । तद्यथा-

"मन्दं मन्दमुपैति गन्धसहितः शैत्यान्वितः सर्वतः
वायुशचाल्वयाः खगा युवयुताः कूजन्ति सानन्दिताः।
लाङ्गूलेन युता मृगा बल भृतो धैर्येणधावन्त्यहो,
दृश्यन्ते खलु शोभनानि सततं दृश्यानि पुण्ये क्षणे॥[7]"

उपर्युक्ते पद्ये कविना व्रज-क्षेत्रस्य सौन्दर्यस्य वर्णनं कृतं वर्तते । यस्मिन् माधुर्यव्यञ्जकैर्वर्णैः समगुम्फिता समासरहिता लघु-लघु समासयुक्ता वा मनोहरा स्थितिः दृश्यते, अतः वैदर्भीरीतेः रचनाशैली भवति इयम्।
तथैव-

चदति चतुर पक्षी चातको मेघविन्दून्,
छदति सपदि मेघः स्वोग्ररूपैस्तदानीम्।
जषति मुदितशक्रस्तं स्ववज्रेण शीघ्रं
झषति कुशलचञ्च्वा भाग्यवान् स प्रभाते[8]॥

उपर्युक्ते पद्ये कविना व्रज-क्षेत्रस्य प्राकृतिक-सौन्दर्यस्य वर्णनं कृतं वर्तते । यस्मिन् माधुर्यव्यञ्जकैर्वर्णैः समगुम्फिता समासरहिता लघु-लघु समासयुक्ता वा मनोहरा स्थितिः दृश्यते, अतः वैदर्भीरीतेः रचनाशैली भवति इयम्।

**गौडीरीतेः स्वरूपम्-**

गौडीरीतेः स्वरूपं स्पष्टीकुर्वन् आचार्यः विश्वनाथ कविराजः साहित्यदर्पणस्य नवमेपरिच्छेदे निगदति-

ओजः प्रकाशकैर्वर्णैर्बन्ध आडम्बरः पुनः, समासबहुला गौडी ।

अर्थात् ओजप्रकाशिका, कठिनवर्णयुक्ता, अत्यधिकसमासयुक्ता उद्भटबन्धः गौडीरीतिः कथ्यते ।
अस्याः शैल्याः प्रयोगः कविना कृष्णोदयमहाकाव्ये मुक्तकण्ठेन कृतं वर्तते ।
तद्यथा-

डंकानादं प्रवृद्धं नव-नव रसिका मल्लहेतोर्महान्तः,
श्रुत्वा मल्लोचितेनासितसितवसनेनावृता वीरभावैः।
व्यायामैर्दण्डभूतः शतशतविहितैर्दर्शयन्तः स्वपक्षं,
चक्रुर्हुंकारशब्दं पृथुभुजजघनां मांसलाः पिण्डभूताः[9]॥

अस्मिन्नपि उदाहरणे मातुलेन कंसेन सह योद्धं भगवतः श्रीकृष्णस्य युद्धभूमौ समुपस्थिकालिकं वर्णनं कविना कृतं वर्तते । पद्येऽस्मिन् ओजप्रकाशिका, कठिनवर्णयुक्ता, अत्यधिकसमासयुक्ता उद्भटबन्धः दृश्यते । अतः गौडीरीते उदाहरणामिदं वर्तते ।
तथैव-

डंकानादेन सार्धं सुपठितवदनौ बालकौ वीक्ष्य केन्द्रे,
कंसेनाज्ञा प्रदत्ता निजविधि सहिता मल्लप्रारंभजन्या।
दृष्टौ पूर्णं पुनस्तौ पटुतरबलिनौ वक्षसि क्रीडनस्थौ,
लोकौर्वीरैः समस्तैर्नवनववसनैरावृतैबलिवृद्धैः[10]॥

अस्मिन्नपि उदाहरणे मातुलेन कंसेन सह योद्धं भगवतः श्रीकृष्णस्य युद्धभूमौ समुपस्थिकालिकं वर्णनं कविना कृतं वर्तते । पद्येऽस्मिन् ओजप्रकाशिका, कठिनवर्णयुक्ता, अत्यधिकसमासयुक्ता उद्भटबन्धः दृश्यते । अतः गौडीरीते उदाहरणामिदं वर्तते ।

**पाञ्चालीरीतेः स्वरूपम्-**

पाञ्चालीरीतेः स्वरूपं स्पष्टीकुर्वन् आचार्यः विश्वनाथकविराजः साहित्यदर्पणस्य नवमे परिच्छेदे निगदति-

"वर्णैः शेषैः पुनर्द्वयोः समस्त पञ्चषड्पदो बन्धः पाञ्चालिका मता ॥"

अर्थात् वैदर्भी तथा गौडी उभयोः रीतयोः अवशिष्ट वर्णे अर्थात् ये वर्णाः न तु माधुर्यव्यञजकाः सन्ति न वा ओजव्यञ्जकाः तैः वर्णैः या रचना कृरितये यास्यां पञ्च षड् पदानां समासः भवति। सा भवति पाञ्चाली रीतिः।
अस्याः शैल्याः प्रयोगः कविना कृष्णोदयमहाकाव्ये मुक्तकण्ठेन कृतं वर्तते । तद्यथा-

"टलति किल तुरङ्गो रश्मिबद्धः प्रभाते,
ठपठपमितिशब्दैस्फोटयत्याशु कर्णम्।
डयित विहगमाला संगता मित्रभावात्,
ढवढयति नूनं कुम्भकारो गृहस्थः॥[11]"

उदाहरणेऽस्मिन् कविः प्राकृतिकविकासधारितस्य सुरम्य भारतस्य सुन्दरग्राम्य-सुप्रभातस्य वर्णनप्रसङ्गे कोमलवर्णस्य कठोरवर्णस्य च सम्यक समन्वयनं कृतवानस्ति । अतः पद्यमिदं पाञ्चालीरीते अप्रतिमम् उदाहरणं वर्तते ।
तथैव-

द्रुततरगतियुक्ताः कामिनीभिर्युवानो,
मृदुलकरगृहीता वाटिकायां भ्रमन्ति ।
सपदिनगरवृद्धास्तान्विलोक्यायताक्षीन्,
दधति मनसि दुःखं शान्तभावास्तदानीम् [12]॥

उदाहरणेऽस्मिन् कविः सुप्रभाते भ्रमणार्थं वाटिकीयां प्रविष्टानां कामिनी-वृद्ध-यूनाञ्च विभेद- वर्णनप्रसङ्गे कोमलवर्णस्य कठोरवर्णस्य च सम्यक समन्वयनं कृतवानस्ति । विविधपदानां सामासिकशैल्यां समगुम्फनमपि दृश्यते ।अतः पद्यमिदं पाञ्चालीरीते समीचीन उदाहरणं वर्तते ।

[4] काव्यालङ्कारसूत्रवृत्तिः-1.2.11,
[5] सहित्यदर्पणः-9.2,
[6] काव्यालङ्कारः-1.6,
[7] कृष्णोदयमहाकाव्यम्-7.48
[8] कृष्णोदयमहाकाव्यम्-9.41
[9] कृष्णोदयमहाकाव्यम्-13.10
[10] कृष्णोदयमहाकाव्यम्-13.13
[11] कृष्णोदयमहाकाव्यम्-9.42
[12] कृष्णोदयमहाकाव्यम्-9.52

इत्थं सारांशतया वक्तुं शक्यते यत् भावाभिव्यक्तेः प्रक्रियायां कवेः सङ्केतितार्थः एक एव भवति, किन्तु तस्यार्थस्य द्योतकानां शब्दानां भिन्नतायाः कारणेन वाक्यविन्यासेऽपि भिन्नता समायाति। अस्याः भिन्नतायाः प्रदर्शकं तत्त्वमेव रीतिः कथ्यते । यत् काव्यसमालोचनप्रक्रियायाम् अपरिहार्यमेव । कृष्णोदयमहाकाव्यं संस्कृतसाहित्याकाशस्य तादृशं देदीप्यमानं नक्षत्रं वर्तते यत् संस्कृतकाव्यपिपासितानां हृदयम् पौनः पुन्येनाह्लादयति । महाकाव्यस्यास्य शब्दसम्गुम्फनशैली अतीव मर्मस्पर्शी वर्तते। साहित्यिकी रचनाशैलीरीतिः त्रिवेणीरिव अत्र विराजते।

**सन्दर्भ**

1. कृष्णोदयमहाकाव्यम्, पाण्डेयः डॉ. रामाशीश, प्रबोधसंस्कृत प्रकाशनम्, रांची, बिहार।